अध्याय :- ५७ * Chapter-57

नारद उवाच ।।[१]

ततो विप्रा नारदश्चैवं समाराध्य महेश्वरम् ।।
महीनगरके पुण्ये स्थापयामास शंकरम् ।। १

लोकानां च हितार्थाय केदारं लिंगमुत्तमम् ।।
अत्रीशादुत्तरे भागे महापातकनाशनम् ।। २

अत्रिकुण्डे नरः स्नात्वा श्राद्धं कृत्वा यथाविधि ।।
अत्रीशं च नमस्कृत्य केदारं यः प्रपश्यति ।। ३

मातुः स्तन्यं पुनर्नैव स पिबेन्मुक्तिभाग्भवेत् ।।
ततो रुद्रो नीलकंठ नारदाय महात्मने ।। ४

स्वयं दत्त्वा स्वयं तस्थौ महीनगरके शुभे ।।
कोटितीर्थे नरः स्नात्वा नीलकंठ प्रपश्यति ।। ५

जयादित्यं नमस्कृत्य रुद्रलोकमवाप्नुयात् ।।
जयादित्यं जयंतिकूपे स्नात्वा नरोत्तमाः ।। ६

न तेषां वंशनाशोऽस्ति जयादित्यप्रसादतः ।।
इदं ते कथितं पार्थ महीनगरस्य च ।। ७

आख्यानं सकलं श्रुत्वा सर्वपापैः प्रमुच्यते ।। ८

*२ इति श्री स्कांदे.....नीलकंठ माहात्म्य वर्णनं नाम सप्तपंचाशत्तमोऽध्यायः ।।

---

* The whole 57th chapter of printed work is missing from the M.S.S. 'B'

१ अ. श्री नारद ।।

२ अ. इति श्री स्कंदपुराणे नीलकंठ माहात्म्यं ।।